**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# ज्योतिषदर्शने नारीत्वम्

**शालिग्रामढकालः**

*उपप्राध्यापकः, ने.सं.वि., वाल्मीकिविद्यापीठम्*

sgddhakal@gmail.com
https://orcid.org/0009-0005-7410-4093
https://doi.org/10.3126/srj.v1i2.99140

**शोधसारः**

*शोधलेखोऽयं सनातनवैदिकपरम्परायां नारीशक्तिस्वरूपस्य गवेषणात्मकं तथा दार्शनिकं विश्लेषणं प्रस्तौति। नारीणां धर्म एव नारीत्वमस्ति। तद् नारीत्वं ज्योतिषदर्शनालोके कथं सिद्ध्यतीत्यत्र विविच्यते। आधुनिकसमाजशास्त्रस्य 'स्त्रीसशक्तीकरणम्' इत्यस्याः परिभाषायाः परिधिमतिक्रम्य तथा च सर्वोपरि नारीत्वमिति वास्तविकं तत्त्वं ग्रहजन्यप्रभावेण विचार्यते। विशेषरूपेण सृष्टिनिर्माणस्य शक्तिरिति तत्त्वं स्त्रीरूपात्मकं वर्वर्ति सर्वोपरि। अत एव वैदिकवाङ्मये "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इत्यनेन नारीगौरवस्य वैशिष्ट्यमुररीकृत्। किन्तु वर्तमानयुगस्य यान्त्रिकसभ्यतायां नारी केवलं भोग्या अथवा सामाजिकाधिकारस्य पात्रा इव परिगण्यते। शोधोऽयं नारी केवलं भोग्या न अपितु सा सृष्टेराधारभूता चैतन्यशक्तिरिति प्रतिपादयति। उपनिषदां प्रकृतितत्त्वम्, पुराणानां शक्तिसाधना तथा आधुनिकसमाजस्य नारीसङ्घर्षः, इत्येतेषां त्रयाणां ज्योतिषालोकेन समन्वयः कृतः। शोधलेखेऽस्मिन् नारीत्वस्य स्वरूपद्वयम्, एका सृष्टेर्जननी, पालनकर्त्री च, अपरा चण्डिकास्वरूपेण संहारकर्त्रीति विवेचितमस्ति। नारीत्वस्य जैविकपरिधिस्तथा आध्यात्मिकगरिमा इत्यनयोर्मध्ये विद्यमानं सामञ्जस्यमस्य शोधस्य मुख्यं वैशिष्ट्यमस्ति। आधुनिकसमये नारीवादस्य यो दृष्टिकोणोऽस्ति, सः प्रायः पाश्चात्यमूल्यैरनुप्रेरितः। अयं शोधस्तद्विपरीतं पूर्वीयसंस्कृतेरर्धनारीश्वरात्मकदर्शनस्य साहाय्येन प्रतिपादयति यत् पुरुष-स्त्रीशक्त्योः सन्तुलनेनैव समाजस्य, समग्रस्य विश्वस्य च कल्याणं सम्भवति। तस्य कृते  खगोलीयग्रहाणां प्रभावो नार्या मातृत्वगुणैः सह संयोजयति। ज्योतिषशास्त्रानुसारं चन्द्रः (मनसः कारकः), गुरुः (सन्ततिकारकः) तथा शुक्रः (स्त्रीत्वस्य कारकः) इत्येतेषां स्थितिर्नार्या मातृत्वशक्तौ विशिष्टं खलु प्रभावं जनयतीत्यत्र विश्लेषितम्। निष्कर्षेण नार्या मातृत्वगुणः केवलं जैविको न अपितु ग्रहनक्षत्रस्थित्या नियन्त्रित एक आध्यात्मिक ऊर्जाप्रवाहोऽस्ति।*

**शब्दकुञ्जिकाः** – गर्भावस्था, ग्रहाः, नारी, विकासप्रकिया, सन्ततिः, सृष्ट्याधारः।

**विषयप्रवेशः**

नरस्य धर्माचारोऽस्याम् वा नरधर्माचारयुता, इति विग्रहे नृधातोर्नारीशब्दः सिद्ध्यति। नरस्येयं वा नारी। नारीशक्तिरीश्वरीयशक्तिरस्ति। ता एव नारीशक्तय ईश्वरीयाः शक्तयः, पालनकर्यः, प्रकृतयस्तथा च सर्वविधसद्गुणनिधयः सन्ति। अत एवोक्तम् -

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।। (मनुस्मृतिः, ३ । ५६) ।

अस्य तात्पर्यमेतदेव वर्तते यद् यत्र नार्या गौरवपूर्णं स्थानं भवति, तत्रैव देवतुल्याः शक्तयः प्रसन्नतां प्राप्नुवन्ति। तथा यत्र तस्या निरादरो भवति तत्र कृताः सर्वा अपि क्रिया निष्फला भवन्ति। नारी प्रकृतिशब्देनाप्यभिधीयते। नार्याः स्त्री, योषित्, अबला, योषा, नारी, सीमन्तिनी, वधूः, प्रतीपदर्शिनी, वामा, वनिता, महिला इत्यादयः पर्यायवाचिनो बहवः शब्दा वर्तन्ते। यथा –

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।

प्रतीपदर्शिनी वामा वनिता महिला तथा ।। (अमरकोषः, पृ.-११४) ।

यदा नारीस्वरूपिण्यां प्रकृतौ सत्यां गुणगणाढ्याः सन्तानाः समुत्पद्यन्ते तदा सृष्टिः समुज्ज्वला भवति, संसारश्च तस्यां कृतज्ञः सम्मोहितः सन् स्वस्योत्कर्षं प्राप्नोति। वेदोपनिषत्सु पुराणेषु च नारी सृष्टेर्जननीरूपेण मातृत्वस्याधिष्ठात्रीरूपेण च नारीणां स्थानं वर्णितमस्ति। ज्योतिषशास्त्रे तु ग्रहजन्यप्रभावैस्तासां सर्वमप्यूहापोहं वर्ण्यते। कुण्डल्यां द्वादशभावेषु मध्ये विशेषरूपेण लग्न-पञ्चम-सप्तम-भावस्थितग्रहाणां प्रभावेण स्त्रीणां स्वभावः, मातृत्वशक्तिस्तथा ममत्वस्य मापनं विचार्यते। अत्र प्रकृतिस्वरूपाणां नारीणां नारीत्वं खगोलीयग्रहप्रभावेण विलोक्यते। अत एव प्रत्येका जननी स्वकुक्षौ समुत्पद्यमानः सन्तानो राम-कृष्ण-गौतमबुद्ध-सदृशा महान्तोऽथवा सत्पुरुषतुल्यः सन् सूर्यवत् कुलं प्रकाशेत इति वाञ्छति। ईदृशानां सत्पुत्राणां जन्मना एव जनन्या मातृत्वं सफलं सार्थकं च भवति। एतत्तु शास्त्रे केवलं वर्णितमेव न अपितु वैज्ञानिकदृष्ट्यापि संसिद्धं कृतमस्ति यत् सन्तानस्य जन्म केवलं संयोगेनैव न जनिमतः सन्तानस्य शारीरिकमानसिकविकासप्रक्रियायां गर्भाधाने गर्भावस्थायाञ्च मातुर्ये चाहार-विहार-आचार-विचार-व्यवहारा वर्तन्ते तेषामाधारेण मानवस्य व्यक्तित्वं निर्धारयति। अत एव गर्भिण्याः सकारात्मकचिन्तनम्, सदाचारस्तथा च सत्साहित्यपठनमावश्यकम्। तदर्थं सर्वदा शुद्धाहारस्यावश्यकता वरीवर्ति। शुद्धाहारो नाम धर्मसम्मतमार्गेण, सत्यनिष्ठया तथा स्वश्रमार्जितधनेन लब्धाहारः। यादृशमन्नं भुज्यते, तादृशमेव मनो भवति। यथा चोक्तम्-

आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः ।

स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ॥ (छान्दोग्योपनिषद्, ७ । २६ । २)

अर्थादाहारस्य शुद्ध्या, अन्तःकरणस्य शुद्धिर्भवति, अन्तःकरणस्य शुद्ध्या च स्मृतिः (ज्ञानशक्तिः) दृढा भवति, यया च हृदयस्य सर्वा ग्रन्थयो भिद्यन्ते। अतो मात्रा पित्रा भुक्तमन्नमेव सन्ततौ दृश्यते। तस्मात् सत्कर्मोपार्जितमन्नमेव भोक्तव्यम्। येन सुसन्ततिर्जायते।

## शोधसमस्योद्देश्यञ्च

वर्तमानयुगे नारीत्वस्यार्थः केवलं भौतिकं शरीरं वा सामाजिकसङ्घर्षं प्रति सीमितो जातो दृश्यते। 'नारी' इत्यस्य जैविकसत्तायास्तथा नारीत्वमित्यस्याध्यात्मिकशक्तितत्त्वस्य मध्ये यद् वैशिष्ट्यं विद्यते तद् विस्मृतमिति वक्तुं शक्यते। समाजो नारीं कया दृष्ट्या पश्यति तथा च नारी स्वशक्तिं कथं अवगच्छति ? इति गभीरं प्रश्नं शोधसमस्यारूपेण गृहीतमस्ति। तथैव वर्तमानकाले अनेकविधाः मनोवैज्ञानिक-शारीरिककारणात् नार्यो मातृत्वसुखाद् वञ्चिता भवन्ति वा तासु मातृत्वगुणस्य अभावो दृश्यते। उत वा ताः प्रसवपीडां सोढुं नैव क्षमन्ते। अतः किमस्य मूलकारणं केवलं भौतिकं स्वास्थ्यमस्ति ? उत वा ग्रहाणां प्रतिकूलस्थितिः सन्ततिसुखे बाधां जनयति ? ग्रहाणां स्थितिर्नार्या मातृत्वगुणे कथं प्रभावं दर्शयतीयमेवात्र समस्या वर्तते। यथा –

१) प्रकृतिस्वरूपिणी नारी कथं ज्ञायते ?

२) नार्यां ग्रहाणां प्रभावः कीदृशः ?

पूर्वीयदर्शने नारीणां स्थानमर्धाङ्गिनीरूपेण वर्णितमस्ति। समस्यायामागतयोः प्रश्नयोः समाधानाय लेखोऽयमारचितः। अतो निम्नमुद्देश्यद्वयमस्य लेखस्य वर्तते –

१) प्रकृतिस्वरूपिणीनां नारीणां नारीत्वबोधः।

२) नार्यां ग्रहाणां प्रभावविवेचनम्।

## अध्ययनविधिः

आरच्यमाने शोधलेखनक्रमे विविधानां सङ्कलितानां सामग्रीणां विशेषरूपेण विश्लेषणात्मक-वर्णनात्मक-तुलनात्मकविधयोऽत्र प्रयुज्यन्ते। पुस्तकालयीयविधिद्वारा सम्भवति सर्वमेतत्।

## पूर्वाध्ययनम्

ज्योतिषदर्शने नारीत्वमिति शीर्षकात्मकस्य लेखस्याध्ययनक्रमे विविधा ग्रन्थाः पठिताः। आषर्ग्रन्थेषु नारीमहिमा एव विलोकितः। ज्योतिषग्रन्थे तु स्त्रीजातकरूपेण, निषेकाध्यायादिरूपेण चर्चा विहिता दृश्यते। परन्तु वास्तविकरूपेण नारी कथं प्रकृतिरस्ति, नारीत्वस्य वैशिष्ट्यं किङ्कथञ्च दृश्यत इति गभीरं चिन्तनं नैव दृष्टम्। अतोऽयं लेखः सिर्जितः।

## सृष्ट्यर्थं रजोदर्शनकारणम्

या नारी पुष्पवती न भवति सा सुगन्धमयं सन्ततिसुखं नैव प्राप्नोति। पुष्पदर्शनं विना नारीणां नारीत्वसिद्धिर्नैव जायते। नारीषु रजोदर्शनस्य हेतुर्विचार्यते चेद् ग्रहाणां चिन्तनं करणीयम्। ज्योतिषशास्त्रानुसारं रजस्वलाधर्मस्य सम्बन्धो मुख्यतया चन्द्रेण तथा मङ्गलेन सह भवति। अग्नितत्त्वात्मको भौमः पित्तकारकत्वेन राजते। रक्तरूपजलकारकत्वेन च सोमो राजते। कुण्डल्यां सोमो लग्नादनुपचयस्थः(१, २, ४, ५, ७, ८, ९, १२)। तत्रस्थं सोमं यदा भौमः पूर्णदृष्ट्या विलोकयति चेत् तदा रजोदर्शनं भवति। अतस्तद्ग्रहप्रभावेण नार्यो रजस्वलाचक्रं प्रतिमासं प्रचलति। यथोक्तम्-

इन्दुर्जलं कुजोऽग्निर्जलमसृगथवाग्निरेव पित्तं स्यात्।<br>
एवं रक्ते हीने पित्तेन रजः प्रवर्तते स्त्रीषु।।<br>
एवं यद्भवति रजो गर्भस्य निमित्तमेव कथितं तत्।<br>
उपचयसंस्थे विपुलं प्रतिमासं दर्शनं तस्य।। (सारावली, ८(३-४)।

तथैव पुरुषस्य जन्मराशेरुपचय(३, ६, १०, ११) स्थानस्थं सोमं बृहस्पतिर्विलोकयति चेत् तदा रजोदर्शनाद् दशदिनानन्तरमुभयोः संयोगोऽमोघाय गर्भाय भवति। वराहमिहिरवैद्यनाथयोर्वचनमस्ति यत्–

कुजेन्दुहेतु प्रतिमासमार्तवं<br>
गते तु पीडर्क्षमनुष्णदीधितौ।<br>
अतोऽन्यथास्थे शुभपुङ्ग्रहेक्षिते<br>
नरेण संयोगमुपैति कामिनी।। (बृहज्जातकम्, ४।१), (जातकपारिजातः, ३।११)।

नारीणां प्रथमरजोदर्शनसमयानुसारेणापि सन्ततिजन्यः शुभाशुभत्वबोधो भवति। यदि श्रवण-धनिष्ठा-शतभिषङ्-मृगशीर्ष- रेवती- चित्रा- अनुराधा- हस्त-अश्विनी-तिष्य- उत्तरफाल्गुनी-उत्तराषाढा- उत्तराभाद्रपदा- रोहिणी- स्वाती चैतेषु पञ्चदशनक्षत्रेषु शुक्लाम्बरपरिधाना स्त्री प्रथमवारं रजोवती भवति चेदतीव सौभाग्यशालिनी भवति। मूल- पुनर्वसु-मघा-विशाखा-कृत्तिकानक्षत्राणि पञ्च मध्यफलदायकानि। भरणी-आर्द्रा-अश्लेषा-पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-ज्येष्ठानक्षत्राणि सप्त प्रथमरजोदर्शनेऽतीव निन्दितानि। कथितञ्च –

श्रुतित्रयमृदुक्षिप्रध्रुवस्वातौ सिताम्बरे।
मध्यं च मूलादितिभे पितृमिश्रे परेष्वसत्।। ( मुहूर्तचिन्तामणिः, ५। २)।

तथैव भद्राकरणे निद्रावस्थायां सूर्यसङ्क्रमणसमये, अमावास्यायां, रिक्तायां, षष्ठ्यामष्टम्यां द्वादश्यां तिथौ, वैधृतियोगे रुग्णावस्थायां, सन्ध्यावस्थायां सूर्यसोमग्रहणसमये व्यतीपाते च प्रथमरजोदर्शनं निन्द्यं कथितम्। तस्य प्रभावेण नार्याः सन्ततिसुखेषु बाधा जायते। अतस्तद्दोषनिवारणाय शान्तिकर्म करणीयम्। तेन शुभो भवति। उक्तञ्च –

भद्रानिद्रासङ्क्रमे दर्शरिक्ता-
सन्ध्याषष्ठीद्वादशीवैधृतेषु।
रोगेऽष्टम्यां चन्द्रसूर्योपरागे
पाते चाद्यं नो रजोदर्शनं सत्।। (मुहूर्तचिन्तामणिः, ५। ३)।

अत एतामवस्थां विहाय शुभसमये तद्दर्शनं भवति चेद् नारीत्वसिद्धौ न कापि विप्रपत्तिः। सर्वमेतत्तु जन्मकुण्डल्यां विद्यमाना ग्रहा यदा बलवन्तो भवन्ति तथा च शुभग्रहस्य प्रभावो दृश्यते तदा रजस्वलाचक्रं नियतसमये शुभद्योतकत्वेन प्रचलति। येन नार्यां गर्भधारणक्षमता परिवर्धते। तद्विपरीतपरिस्थितौ, अर्थात् ग्रहाणां निर्बलत्वे वा पापग्रहाणां शनि-राहु-केतूनां प्रभावे रजस्वलासमये स्त्रियः स्वास्थ्ये वैषम्यम्, कष्टं भवितुं शक्नोति। अतो ज्योतिषदर्शनदृष्ट्या ऋतुचक्रस्य नियमनार्थं ग्रहाणामानुकूल्यमतीवावश्यकम् वर्तते।

## गर्भाधानविज्ञानम्

सन्तानोत्पत्तौ मातापित्रोः रजोरेतसोः सम्मेलनं परमावश्यकम्। ग्रहणार्थकात् गृधातोर्गर्भाधानं भवति। यस्यार्थो भवति गृणाति बीजम्, ततो बिभर्तीति गर्भस्तदर्थमाधानमिति गर्भाधानम्। गर्भाधानेनैव स्त्रीणां नारीत्वसिद्धिर्भवति। तद्विना नारी पूर्णा नैव भवति। अतो नारीत्वसिद्धये तदेव परमं महत्त्वपूर्णञ्च सोपानमस्ति। प्रसवोत्तरं मातुः स्वास्थ्यं तथा शिशोः पोषणं यावद् महत्त्वपूर्णं वर्तते, तावदेव महत्त्वपूर्णं गर्भाधानस्य समयोऽपि। गर्भाधानात् पूर्वं दम्पत्योः शारीरिकं तथा मानसिकं स्वास्थ्यं शिशोर्व्यक्तित्वं निर्धारयति। गर्भाधानसमये यदि दम्पत्योर्मनसि वा शारीरिकस्थितौ विकृतिर्भवति तर्हि तस्य प्रभावोऽवश्यमेव सन्ताने दरीदृश्यते। अतो ग्रहाणां प्रभावादीनां चर्चाऽत्र क्रियते।

## ग्रहाणां प्रभावः

जन्मकुण्डल्यामथवा गर्भाधानकालिककुण्डल्यां ग्रहाणां स्थितिरेव गर्भस्य स्वरूपं निर्धारयति। आधानकालिकलग्नात् सप्तमभावे यो राशिस्तस्याधिपानुसारेणाधानक्रिया भवति। तल्लग्नात् सप्तमस्थानं पापग्रहान्वितं पापग्रहदृष्टञ्चेद् रोषपूर्वकं बलाद्भवति तत्कर्म। यदि शुभग्रहान्वितं शुभग्रहविलोकितञ्चेद् हासविलासप्रसन्नतापूर्वकमाधानकर्म भवति। कथितञ्च -

यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः।

असद्ग्रहालोकितसंयुतेऽस्ते सरोष इष्टैः सविलासहासः ।। (बृहज्जातकम्, ४ । २) ।

कुण्डल्याः सप्तमभावेऽशुभग्रहाणां स्थितियुतिदृष्टिबलप्रभावो वर्तते चेद् ग्राम्यपशुवत् कर्म भवति। तत्रैव सौम्यग्रहाणामेव प्राबल्यञ्चेद् वात्स्यायनोक्तकामसूत्रानुसारेण सौम्यरूपं सुरतं भवतीति कल्याणवर्मणो मतमस्ति। यथा –

अस्तेऽशुभयुतदृष्टे सरोषकलहं भवेद् ग्राम्यम् ।

सौम्यं सौम्यैः सुरतं वात्स्यायनसंप्रयोगिकाख्यातम् ।। (सारावली, ८ । ९) ।

तस्मिन् संयोगसमये यदि सूर्य-सोम-भौम-भार्गवाः स्वस्य स्वस्य नवमांशे विराजितास्तथा सन्ततिकारको बृहस्पतिस्त्रिकोणे वा लग्ने समधिष्ठितश्चेद् जातकस्य वीर्यममोघं जायते। नारीत्वसाधने तद्धारणमनिवार्यम्। अतस्तस्य प्रभावेण पुंस्त्वगुणाधिक्येन कुलदीपकरूपेण प्रदीप्तो भवति च धृतो गर्भः। यथोक्तम् –

रवीन्दुशुक्रावनिजैः स्वभागगैर्गुरौ त्रिकोणोदयसंस्थितेऽपि वा ।

भवत्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ।। ( बृहज्जातकम्, ४ । ३) ।

तस्यां गर्भावस्थायां यदि गर्भवत्याः स्त्रियः संयोगाधानलग्नं पापकर्तर्यां वर्तते। शशाङ्कोऽपि पापग्रहयोर्मध्ये विराजते वा लग्ने चन्द्रस्यावस्थितिरस्ति। तादृशस्य चन्द्रस्थस्य लग्नस्य द्वितीयभावे द्वादशभावे च केवलं पापग्रहयोः प्रभावो वर्तते, तत्र कस्यापि शुभग्रहस्य शुभप्रभावो न वर्तते चेद् गर्भयुता नारी कष्टसागरे निमज्जति। यदि लग्नचन्द्रयोरुभयोः पापद्वयमध्यसंस्थयोरपि शुभग्रहसन्दृष्टौ सत्यां गर्भिणी कष्टसागरात् पारं याति। पृथक् स्थितयोर्लग्नसोमयोः पापद्वयमध्यस्थितयोः सोमस्य शुभग्रहदृष्टत्वे लग्नस्य च शुभग्रहदृष्टिराहित्ये केवलं गर्भकष्टमनुभवति। कथितञ्च –

अशुभद्वयमध्यसंस्थितौ लग्नेन्दू न च सौम्यवीक्षितौ ।

युगवत् पृथगेव वा वदेन्नारी गर्भयुता विपद्यते ।। (बृहज्जातकम्, ४ । ७) ।

तेनैव प्रकारेण निषेकलग्नाद् वा चन्द्रात् त्रिकोण-जाया-धन-सुख-गगनस्थितैः शुभग्रहै-र्बुध-गुरु-शुक्रैस्तृतीय-लाभोपगतैः कुज-सौरि-सैंहिकेय-शिखाभिश्च सुखान्वितो गर्भो भवति। अर्थाद् गर्भावस्थायां नारी विशेषानन्दमनुभवति। चन्द्रस्योक्तस्थानस्थितेषु शुभेष्वशुभेषु दिवाकरदृष्टिरस्ति चेत्, अथवा लग्नस्योक्तस्थानस्थितेष्वशुभेषु शुभेषु च दिनमणिदृष्टिर्वर्तते चेत् सम्यग् गर्भपुष्टिमश्नुते। एतेनापि गर्भधारणे आनन्दानुभूतिर्दृश्यते। गर्भोऽपि सुखरूपो जायते। उट्टङ्कितञ्च –

शशाङ्कलग्नोपगतैः शुभग्रहैस्त्रिकोणजायार्थसुखास्पदस्थितैः ।

तृतीयलाभर्क्षगतैरशोधनैः सुखी तु गर्भो रविणा निरीक्षितः ।। ( बृहज्जातकम्, ७ । १०) ।

अतो वक्तुं शक्यते यद् गर्भाधानकाले शुभग्रहाणां प्रभावो भवति तर्हि गर्भः सुखदस्तेजस्वी तथा मेधावी भवति। यदि पापग्रहाणां प्रभावो भवति तर्हि कष्टप्रदो रोगग्रस्तोऽथवा विपरीतगुणयुक्तो गर्भ उत्पद्यते। गर्भाधानकालिकग्रहजन्यशुभाशुभप्रभावः सन्ततौ सदैव सन्दृश्यते।

**पर्यावरणप्रभावः**

गर्भाधानसमये बाह्यं तथा आन्तरिकं वातावरणं सर्वथा सर्वदोषमुक्तं स्यात्। दम्पत्योर्मनसि दुःखं, चिन्ता, भयमथवा मानसिकाधिः शारीरिकव्याधिरपि कदापि न भवेत्। निषेचनसमये स्त्रीपुंसोर्हृदि प्रचुररूपेणाह्लादसञ्चारः

स्यात्, सुखानन्दवर्धकः पूर्व-ईशान-उत्तरदिग्भ्यः सञ्चरितः सुगन्धसमेतः समीरः स्यात्, पूर्णचन्द्रिकोपेतं सुधांशुयुक्तं गगनतलं स्यात् तर्हि सर्वदैव गर्भः सुखसंवर्धको भवति। वराहमिहिरमतमस्ति यत् –

ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतो वियद्विमलम्। (बृहत्संहिता, २१। १४)।

अनुकूलं बाह्यपर्यावरणं, समैक्यभावोपेतं मानसञ्चानिवार्यमस्ति। तेनैव मातापित्रोः हृदययोः प्रीतिः, सौहार्दं तथा प्रसन्नता निश्चयेन परिवर्धते। तदेव भावरूपेण गर्भगतो भवति। तस्मिन् गर्भसमये नरनार्योर्यो भावो सुदृढरूपेणाभिषिक्तो भवति तदेव तेजोरूपेण गर्भान्वितो भवति। अतस्तस्यैव भावस्य परिपुष्टिरूपेण सन्ततिर्जातये। जातकस्य जीवने भावानुसारं सिद्धिः प्राप्यते। कथितञ्च नीतिशास्त्रे –

यादृशी भावना भवति तादृशी सिद्धिर्भवति। (पञ्चतन्त्रम्, ५। ९६)

तस्माद् गर्भाधानकाले दम्पत्योर्यद् मानसिकं भावं भवति, तदनुरूपमेव गर्भस्य स्वरूपं जायते। यथोक्तम् –

मिथुनस्य मनोभावो यादृङ्गदलालसं भवति।

श्लेष्मादिभिः स्वदोषैस्तत्तुल्यगुणो निषिक्तः स्यात्।। (सारावली, ८। १३)।

वेदव्यासेनापि एतदेव सङ्कथितं वर्तते। तद्यथा -

निषेकसमये यादृङ्नरचित्तविकल्पना

तादृक्स्वभावसम्भूतिर्जन्तुर्विशति कुक्षिगः।। ( गरुडमहापुराणम्, १५। १६)।

यदा दम्पत्योः पुण्यकर्मप्रभावेण सुखानन्दभावरूपो गर्भगतो भवति तदा परमानन्दानुभूतिं कुर्वाते मातापितरौ। तस्य सर्वेऽपि संस्कारजन्यानि कर्माणि यथासमये सम्पाद्यन्ते। कथितञ्च –

परमानन्ददः पुत्रो भवेद् गर्भगतः कृती।

भवन्ति तस्य निखिलाः क्रियाः पुंसवनादिकाः।। ( गरुडमहापुराणम्, १५। १९)।

अतो निश्चप्रचं वक्तुं शक्यते यद् गर्भाधानं केवलं पाञ्चभौतिकं शारीरिकसंमीलनमेव न विशेषरूपेण जन्मजन्मान्तरस्य, युगयुगान्तरस्य, कल्पकल्पान्तरस्य च समेषां शुभकर्मणां परिपाकभावरूपं तथा चाध्यात्मिक-मानसिक-सद्भावमिलनस्यैकं पवित्रं सृष्टिसंवाहनमस्ति। तेनैवकारणेन गर्भाधानसमये दम्पत्योर्मानसिकभावौ पूर्णतया प्रसन्नौ पवित्रौ तथा परस्परं भावयन्तौ स्नेहपूर्णौ चानिवार्यरूपेण भवेताम्। येन सुपुष्टभावेन समुत्पन्नः सन्तानस्तेजस्वी, बुद्धिमान्, साहसी तथा कुलस्य नामोज्ज्वलकारकः स्यात्। चतुर्विधपुरुषार्थेन च सम्पन्नो भवेत्।

**गर्भस्य मासिकविकासक्रमः**

यदा मातापित्रोरानन्दभावो गर्भगतो भवति तदा प्रतिमासं तस्याधिवृद्धिर्जायते। यस्मिन् समये शुक्रशोणितसन्निपातो भवति तदा कललमिति कथ्यते। तदेव कललं पञ्चरात्रे गोलाकाररूपेण परिणमते बुद्बुदनाम्ना च विज्ञायते। दशमे च दिवसे कर्कन्धुनामा विज्ञायते। ततो रजोरेतसोः संयोगैक्यरूपेण मांसपिण्डाकारे परिणमते। तस्मात् क्रमशो मस्तकं, ततो हस्तचरणादिकं गर्भोदरे एव निर्मीयते। स्त्रीपुंसादिकं लिङ्गज्ञानं गर्भाधानस्य तृतीयमासे विज्ञायते। ततो रस-रक्त-मांस-मेदोमज्जा-अस्थि-शुक्राः सप्तधातवो जायन्ते। तत्पश्चात् क्षुधा तृषा तत्रोत्पद्यते। षष्ठे च मासे मातुर्दक्षिणकुक्षौ भ्राम्यति। उक्तञ्च –

कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम्।

दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्।।

मासेन तु शिरो द्वाभ्यां बाह्वङ्गाद्यङ्गविग्रहः।

नख-लोमास्थि- चर्माणि लिङ्गछिद्रोद्भवस्त्रिभिः ।।

चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः ।

षड्भिर्जरायुणा भीतः कुक्षौ भ्राम्यति दक्षिणे ।। ( श्रीमद्भागवतमहापुराणम्, ३ । ३१/२-४) ।

तदनन्तरं सप्तममासे पूर्वपूर्वजन्मनां स्मरणं भवति । गर्भावस्थायाः सर्वं कष्टमप्यनुभवति गर्भस्थो जीवः । शीघ्रमेव गर्भाद् मुक्त्यर्थं परमात्मनः स्तुतिञ्च करोति । मधुराम्ललवणकटुकषायतिक्तभेदात्षड्रसाः सन्ति (तर्कसङ्ग्रहः, पृ.१८) । तेषां मातृभुक्तानामन्नरसानां प्रभावेण जीवो गर्भस्थं जीवनं यापयति । गर्भाधानादारभ्य दशमासपर्यन्तं प्रत्येकस्मिन् मासि विशिष्टस्य ग्रहस्य प्रभावो भवति । तेषां ग्रहाणां प्रभावेणैव गर्भस्य विकासो भवति । प्रथममासे शुक्रस्य प्रभावो भवति । तत्र खलु शुक्रो निषिक्तं बीजं कललं रजसा मेलयित्वा सान्द्रं करोति । ततो गर्भस्य स्वरूपं विरचितं भवति । द्वितीयमासे मङ्गलस्य प्रभावो भवति। मङ्गलो वह्नितत्त्वस्य कारकः । अतः शरीरे तापस्य वृद्धिर्भवति। तस्यैव तापस्य कारणेन अस्मिन् मासि गर्भिण्याः शरीरे कष्टम्, वमनम् तथा भोजनेऽरुचिश्च जायते। यस्याः कुण्डल्यां मङ्गलस्य दुष्प्रभावो दृश्यते तस्याः कष्टमधिकं भवति। मङ्गलस्तु सान्द्रीभूतं गर्भं सघनं करोति। तृतीयमासे बृहस्पतेः प्रभावो भवति। येन गर्भस्य वृद्धिर्भवति। तेनानन्दानुभूतिश्च गर्भवत्यां दृश्यते। अतोऽस्मिन् मासि गर्भिणी सुखस्य तथा प्रसन्नतायाश्चानुभवं करोति । स एव बृहस्पतिर्घनीभूतस्य गर्भस्याङ्कुरं करचरणाद्यवयवानां चिह्नं जनयति । पुंस्त्रीक्लीबत्वञ्च करोति गुरुरेव। चतुर्थमासे सूर्यस्य प्रभावो भवति। येन शरीरस्य कठिनाङ्गानामस्थ्नां निर्माणं भवति। पञ्चममासे चन्द्रस्य प्रभावो भवति। येन शरीरे जलतत्त्वस्य वृद्धिर्जायते तथा चाङ्गानां त्वङ्मांसपेशीनां विकासो भवति। षष्ठे मासे शनेः प्रभावो भवति। अङ्गजानि नखरोमाणि निर्मातानि भवन्ति। शरीरे रोग-प्रतिरोधकशक्तिरुत्पद्यते। सप्तममासे बुधस्य प्रभावो भवति। येन गर्भस्य बुद्धितत्त्वस्य विकासो भवति तथा गर्भः पूर्णतां प्राप्नोति। बुधस्तु चेतनं चैतन्यं करोति। अष्टममासे गर्भाधानकालिक-लग्नस्य तथा गर्भिण्या लग्नेशस्य प्रभावो भवति। यदि गर्भिण्या जन्मलग्नम्, आधानकालिकं लग्नञ्च पापकर्तर्यां पीडितञ्च वर्तते चेत् कष्टाधिक्यं जायते। अतोऽस्मिन् मासि विशेषरूपेण सावधानतया भवितव्यम्। नवममासे चन्द्रस्य पुनः प्रभावो भवति। येन जलतत्त्वस्याभिवृद्धिद्वारा गर्भस्थस्य शिशोः शुष्कत्वमपह्रियते। दशममासे सूर्यस्य प्रभावो भवति। येन अग्नितत्त्वस्याभिवृद्धिर्जायते। तस्यैव प्रभावेण प्रसूतिपवनवेगेन प्रसवो भवति। तस्यां गर्भावस्थायां मासाधिपानां शुभाशुभप्रभावेण शुभाशुभफलं प्राप्यते। वराहमतमस्ति यत् –

कललघनाङ्कुरास्थिचर्माङ्गजचेतनदाः

सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः ।

उदयपचन्द्रसूर्यनाथाः क्रमशो गदिता

भवति शुभाशुभं च मासाधिपतेः सदृशम् ( बृहज्जातकम्, ४ । १६) ।

इत्थं खलु गर्भाधानस्य क्षणतः समारभ्य दशमासपर्यन्तं ग्रहैर्गर्भस्य प्रत्येकमङ्गस्य विकासो विज्ञायते। ज्योतिषदर्शनस्यैषा वैज्ञानिकी दृष्टिराधुनिकस्वास्थ्यविज्ञानेन सह पूर्णतया साम्यञ्च भजते। सारल्यार्थं तालिकाधः प्रस्तूयते

**गर्भस्थितिचक्रम्**

| **मासाः** | **स्वामिग्रहाः** | **तत्त्वानि** | **प्रभावाः** |
|---|---|---|---|
| १ | शुक्रः | जलम् | कललमर्थात् रजोरेतसोः संमिश्रणम् |
| २ | भौमः | अग्निः | बुद्बुदस्य घनरूपमर्थात् पिण्डरूपम्, मूर्च्छनम्, छर्दिः |
| ३ | बृहस्पतिः | जलम् | आनन्दानुभूतिः, हस्तपादाद्यवयनिर्माणम्, लिङ्गनिर्धारणम् |
| ४ | सूर्यः | अस्थि | मज्जा-अस्थिनिर्माणम् |
| ५ | चन्द्रः | जलम् | चर्म, नाडी, मांसाद्यवयववृद्धिः |
| ६ | शनिः | रोम | केशरोमनिर्माणम् |
| ७ | बुधः | बुद्धिः | चैतन्यम्, मानवः पूर्णः |
| ८ | मातुर्लग्नेशः | – | सावधानम्, मातृभुक्तानां रसानामास्वादनम् |
| ९ | चन्द्रः | जलम् | प्रस्रवणप्रयासः |
| १० | सूर्यः | अग्निः | उदरतापः, प्रसूतिः |

अतो गर्भाधानादारभ्य नवमासपर्यन्तं गर्भस्य विकासो भवति। गर्भाधानस्य प्रथमे मासि शुक्रशोणितस्य मेलनेन विकसितो गर्भो दशमे मासि च शिशुरूपेण जन्म भवति।

मासानुमासविकासक्रमेषु ग्रहाणां प्रभावो जननानन्तरमपि दरीदृश्यते। गर्भिण्या आहार-विहार-आचार-विचाराणां प्रभावरूपत्वेन गर्भस्थः शिशु परिवर्धते। अतो गर्भिण्याः सदाचारोऽतीव आवश्यकः।

**गर्भाधानस्य शुभाशुभसमयाः**

विहितसमये कृतेन कार्येण साफल्यमधिगच्छन्ति मानवाः। निषिद्धकाले कृतेनानाचरणेन च वैपरीत्यं फलं प्राप्नुवन्ति। अतो गर्भाधानार्थं कालनिर्धारणमतीव महत्त्वपूर्णम्। ज्योतिषशास्त्रे गर्भाधानार्थं केचित् कालखण्डा निषिद्धाः सन्ति। तिथिगण्डान्तं नक्षत्रगण्डान्तं लग्नगण्डान्तमिति गण्डान्तत्रयं त्यजेत्। तथैव जन्मनक्षत्रात् सप्तमं वधतारां, जन्मनक्षत्रं मूलं भरणीं, अश्विनीं, रेवतीं, मघानक्षत्रं, सोमसूर्ययोर्ग्रहणदिनं, व्यतीपातं वैधृतियोगं, मातापित्रोः श्राद्धदिनं, सूर्यावच्छिन्नकालमर्थात् दिवसकालं, परिघयोगस्य पूर्वार्धं तथा दिव्यान्तरिक्षभौमैस्त्रिविधैरुत्पातैर्दूषितं नक्षत्रं, जन्मराशेरष्टमराशिलग्नं, पापग्रहलग्नं (१, ५, ८, १०, ११), पापग्रहयुक्तं च नक्षत्रं सत्पुत्रेच्छुको जातकस्त्यजेत्। तथैव भद्राकरणं, षष्ठीतिथिमपि त्यजेत्। चतुर्दश्यष्टम्यमावास्यापूर्णिमासङ्क्रमणानि पर्वदिनानि सन्ति यथोक्तम्-

चतुर्दश्यष्टमी चैव ह्यमावास्या च पूर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसङ्क्रान्तिरेव च।। (विष्णुपुराणम्, ३।११।११८)।

एतानि खलु सर्वाणि त्याज्यानि। तथैव रिक्तातिथिं, प्रातःसन्ध्यां, सायं सन्ध्यां, भौमवासरम्, आदित्यवासरं, शनैश्चरवासरं, रजोदर्शनदिनमारभ्य दिनचतुष्टयं च त्यजेत्। उफा., उषा., उभा., मृग-हस्तानुराधा-रोहिणी-स्वाति-श्रवण-धनिष्ठा-शततारकासु च गर्भाधानं शुभदं भवति। उक्तञ्च -

गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं
दास्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम्।
पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्धं स्वपत्नीगमे
भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम्।।
भद्राषष्ठीपर्वरिक्ताश्च सन्ध्याभौमार्कार्कीनाद्यरात्रीश्चतस्रः।
गर्भाधानं त्र्युत्तरेन्द्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत्।। (मुहूर्तचिन्तामणिः, ५।५-६)

कालिदासेनापि ज्येष्ठा-अश्लेषा-आर्द्रा-रेवती-मूल-कृत्तिकानक्षत्राणि तथा उग्रसंज्ञकनक्षत्राण्यर्थात् पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-भरणी-मघानक्षत्राणि गर्भाधानकाले निषिद्धानि कथितानि। यथा –

धाराधरारूढतमीशदारा
सकाशनाह्याभरणान्त्यतारा।
सयातुभा सोग्रशुचीन्दुवामा
नाधानदाने हि वरा पुरन्ध्र्याः।। (ज्योतिर्विदाभरणम्, ७।४)।

तथा च यदा शुभग्रहाः (गुरु-शुक्र-बुध-चन्द्राः) केन्द्र-त्रिकोणेषु बलयुक्ताः भवन्ति तदा गर्भाधानं श्रेष्ठं फलदं भवति। गर्भिण्या मानसिकशान्तिः, दम्पत्योः परस्परप्रीतिस्तथा पूर्णानन्दवातावरणञ्चैते शिशोर्भविष्यं निर्धारयन्ति। रजोदर्शनदिवात् कस्मिन् दिने निषेचनमभूत्, तदनुसारं फलं दृश्यते।

**गर्भाधानसारणीचक्रम्**

| रजस्वला-दिवसः | फलम् |
|---|---|
| चतुर्थदिवसः | अल्पायुः पुत्रः |
| पञ्चमदिवसः | कन्या |
| षष्ठदिवसः | वंशवर्धकः पुत्रः |
| सप्तमदिवसः | वन्ध्या कन्या |
| अष्टमदिवसः | पुत्रः |
| नवमदिवसः | रूपवती पुत्री |
| दशमदिवसः | यशस्वी पुत्रः |
| एकादशदिवसः | विरूपा कन्या |
| द्वादशदिवसः | सौभाग्यशाली पुत्रः |
| त्रयोदशदिवसः | कुलटा कन्या |
| चतुर्दशदिवसः | धार्मिकः पुत्रः |
| पञ्चदशदिवसः | सुलक्षणा कन्या |
| षोडशदिवसः | सर्वज्ञः पुत्रः |

लग्न-चतुर्थ-सप्तम-दशम-पञ्चम-नवमस्थानस्थितैः शुभग्रहैस्तथा तृतीयैकादशषष्ठस्थानस्थितैः पापग्रहैः, सूर्य-भौम-गुरुभिर्दृष्टे लग्ने, मेष-मिथुनादिविषमांशे सोमे सति रजोदर्शनतः समराशौ निषेचनं शुभं कथितम्। तथा चित्रापुनर्वसुपुष्याश्विनीषु तद् गर्भाधानं मध्यमफलदं भवति। यथा चोक्तम् –

केन्द्रत्रिकोणेषु शुभैश्च पापै-स्त्र्यायारिगैः पुंग्रहदृष्टलग्ने।

ओजांशगेऽब्जेऽपि च युग्मराशौ चित्रादितीज्याश्विषु मध्यमं स्यात्।। (मुहूर्तचिन्तामणिः, ५।७)।

तथैव गर्भपुष्टये पुरुषस्य नार्याश्च जन्मदिने, चरलग्ने, पापग्रहात्मके लग्ने सूर्यनवमांशे चाधानं नैव कुर्यात्। उक्तञ्च–

नृयोषितोर्जन्मदिनं वराननां च कामयेदर्भकगर्भपुष्टये।

चरोदये चोदयगैरसाधुभिर्ब्रध्नांशगे तूदयभागनेतरि।। (ज्योतिर्विदाभरणम्, ७।८)।

अतोऽर्धनारेश्वररूपाणां गार्हस्थ्यधर्मपरायणानां सुसन्ततिजननेच्छुकानां स्त्रीपुरुषाणां कृते शुभाशुभसमयो विचारणीयः।

## नारीत्वसिद्धिः

सृष्ट्या, कुलवृद्ध्या एव नारीणां नारीत्वसिद्धिर्भवति। ततो नारी जगज्जननी वर्तते एव। अत एव सा साक्षात् प्रकृतिरूपेणापि विराजते। सा सृष्टेराधारशिला, परोपकारस्य धैर्यस्य च प्रतिमूर्तिस्तथा सर्वविध-सद्गुणानामाश्रयस्थानं वर्वति सर्वोपरि। अत एव देवता अपि तासां परमपूज्यानां नारीणां सदा सम्मानं भवति चेत् प्रसीदन्ति। नारीपूजनं विना कृतानि सर्वाणि कर्माणि निष्फलानि भवन्तीति व्यासवचनमप्यस्ति। यथा -

स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवताः।

अपूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः।। (महाभारतम्, अनुशासनपर्व, ४७।२०)

या नारी स्वमातृपितृकुलं परित्यज्य पतिगृहं गत्वा तत्र प्रीतिभावभरितेन व्यवहारेण प्रेम्णा गृहं स्वर्गमिव करोति। अतः सा धन्या, पूज्या, नमस्या च। यथोक्तम् -

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥ (दुर्गासप्तशती, ५।७१)

एतादृशी नारी चेतनास्वरूपा, बुद्धिरूपा, शान्तिरूपा, शक्तिरूपा, श्रद्धारूपा, लक्ष्मीरूपा, स्मृतिरूपा, दयारूपा तथैव सच्चिदानन्दस्वरूपा च सन्ती निद्रा, क्षुधा, तृष्णा, भ्रान्त्यादिस्वरूपैर्जगदि परिव्याप्ता दृश्यते। तादृशी सर्वव्यापिका शक्तिर्यदा पाञ्चभौतिकदेहात्मिका नारी भवति तदा सूर्यादिनवग्रहजन्यप्रभावैर्नियन्त्रिता भवति। नवग्रहेषु सोमः खलु स्त्रीकारकत्वे राजते। नार्या जन्म यदि समलग्ने समराशौ च भवति तथा तौ लग्नसोमौ शुभग्रहप्रभावान्वितौ स्तश्चेत् सा शीलाचारणादिसद्गुणैः परिपूर्णा भवति। नारीत्वसिद्धौ साफल्यमधिगच्छति च। तद्वैपरीत्येन तु नारीत्वगुणैर्विरहिता भवति। उट्टङ्कितञ्च –

युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री

सच्छीलभूषणयुता शुभदृष्टयोश्च।

ओजस्थयोस्तु पुरुषाकृतिशीलयुक्ता

पापा च पापयुतवीक्षितयोर्गुणोना।। (बृहज्जातकम्, २४।२)।

तथैव मेषादिराशिषु जातायाः स्त्रियो भौमादिग्रहाणां त्रिंशांशप्रभाववशाच्च तासां सर्वं विज्ञायते। यदि च स्त्री शुभग्रहराशौ शुभग्रहलग्ने जातास्ति तथा बृहस्पतिग्रहस्य त्रिंशांशो वर्तते चेत् सा सौभाग्यशालिनी नारीगुणगणागारावच्छिन्ना भवति। यथोक्तम्-

जैवे नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ताऽसती। ( बृहज्जातकम्, २४।५)।

तस्मात् कारणाद् ग्रहजन्यप्रभावेण कर्तुमकर्तुमन्यथाकर्तुं समर्था स्त्री भवति वा कर्तव्यच्युता भवतीति ज्ञानं परमावश्यकम्। अतो नारी नारीत्वसिद्धौ समर्था वाऽसमार्थेति ज्योतिषदर्शनं सुष्ठु निदर्शयति। तावदेव न ग्रहजन्यप्रभावैः साक्षात् शक्तिसम्पन्ना जगज्जननीति ज्ञायते। तादृश्यामवस्थायां सा नारीशक्तिरेव सृष्टौ सर्गरूपा, जगदवनकाले पालनरूपा, संहारसमये च रौद्ररूपा वर्वर्ति सर्वोपरि। अतः सा सर्वैराराध्यास्ति। कथितञ्च –

सृष्टौ या सर्गरूपा जगदवनविधौ पालनी या च रौद्री

संहारे चापि यस्या जगदिदमखिलं क्रीडनं या पराख्या। ( श्रीमद्देवीभागवतमाहात्म्यम्, १।१)।

तासां नारीणां षोडश मातृरूपाः सन्ति। सनातनधर्मस्य वाङ्मये मातृपदं न केवलं जैविकसम्बन्धस्य सूचकम्, अपि तु तद् वात्सल्यस्य, पोषणस्य, आदरस्य च पराकाष्ठा विशिष्टा च स्थितिरस्ति। एतेन नारीत्वमित्यस्य व्यापकदर्शनस्य विविधं मूर्तरूपं बोबुध्यते। यत्र नारीशक्तेर्विविधा आकृतयो मातृवत् पूजनीया मन्यन्ते। या अस्मान् उदरे बिभर्ति सा गर्भदात्री यथा परमवन्द्या तथैव पीयूषरूपक्षीरप्रदानेन जीवनरक्षिणी स्तनदात्री, अन्नरसेन कायपोषिका भक्ष्यदात्री च समाने गौरवास्पदे स्तः। तथैवास्माकं जीवनस्याज्ञानान्धकारं विनिवार्य ज्ञानप्रकाशं यच्छति सः गुरुस्तस्य धर्मपत्नी (गुरुमाता) अपि माता इव पूजनीया वर्तते। अस्माकं यः आराध्यदेवः (यथा शिवः, विष्णुः वा), तस्य अर्धाङ्गिनी (यथा पार्वती, लक्ष्मीः वा) जगन्मातृरूपेण सर्वैर्वन्द्या सर्वदा। पितुरन्या पत्नी अर्थात् सापत्न्यमाता अपि पितृसम्बन्धाद् मातृवत् एव गौरवास्पदा अस्ति। या अचला, पवित्रा, अक्षतयौवना कन्या, सा जगदम्बायाः स्वरूपं मन्यते। अत एव नवरात्र्यादिषु कुमारीपूजा विधीयते। एकेनैव गर्भेण सहजाता सहोदरा अपि मातृवत् स्नेहमयी आदरणीया च भवति। या समाजस्य कल्याणाय सर्वोत्तमं पुत्रं पुत्रीञ्च जनयति, सा श्रेष्ठा नारी अपि समाजे मातृवत् पूज्या। प्रियतमा पत्नी, तां या प्रसूते सा पत्न्या माता अर्थात्, श्वश्रूरपि मातृसमाना भवति। मातुर्जननी अर्थात् मातामही सा मातुः संस्कारदात्री वर्तते। अतः सा पूज्या। पितुर्जननी अर्थात् पितामही याऽस्माकं कुलस्य विशिष्टाधाररूपेण विराजितास्ति, सा विशिष्टा माता। तथैवान्यानि मातृष्वसा, पितृष्वसा, भ्रातृजायादीनि मातृपदतुल्यानि वन्दनीयानि। कथितञ्च -

स्तनदात्री गर्भदात्री भक्ष्यदात्री गुरुप्रिया।

अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका॥

सगर्भजा या भगिनी पुत्रवती प्रियाप्रसूः।

मातुर्माता पितुर्माता सोदरस्य प्रिया तथा॥

मातुः पितुश्च भगिनी मातुलानी तथैव च।

जनानां वेदविहिता मातरः षोडशः स्मृताः॥ (ब्रह्मवैवर्तपुराणम्, गणेशखण्डः, १५/(४१-४३)।

वास्तविकरूपेण नारीजीवनं त्यागस्यापरं नाम वरीवर्ति। सा स्वस्य सुखस्वार्थं परित्यज्य कुलस्य विकासार्थं, सन्तानानां संस्कारार्थं तथा च समाजस्योत्थानार्थं स्वजीवनं समर्पणं करोति। नारीत्वादेव पुरुषः स्वजीवनं पूर्णतां प्राप्नोति। अतो नारी सम्माननीया, पूजनीया तथा च वन्दनीया वर्तते। या नारी धर्मपरायणा, पतिव्रता, बुद्धिमती च भवति। तस्याः सन्ताना अपि लोककल्याणकारका भवन्ति। मातृसंस्कारसंसिक्तास्ते एव मानवा चतुर्विधं पुरुषार्थं

संसाध्यानेकविधानि कर्माणि कृत्वा स्वकुलं गौरवान्वितं कर्तुं प्रयतन्ते। स एव मातृकृपान्वितः पुरुषो यथार्थतः कुलभूषणो यस्यान्तःकरणं साक्षात् परब्रह्मणि विलीनं सञ्जातम्। अतो ग्रहाणामानुकूल्येन गर्भत एव मातुः सुप्रभाववशात् सुकुलीनः सुपुत्रः सञ्जातः। तेन संस्कारभरितेन पुत्रकर्मणा माता च कृतार्था धन्या जाता। उक्तञ्च –

कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन।
अपारसंवित्सुखसागरेऽस्मिन् लीनं परे ब्रह्मणि यस्य चेतः।।
(स्कन्दपुराणम्, माहेश्वरखण्डः, ५५। १४०)।

सर्वमेतत् नारीणां नारीत्वधर्मण्यारूढम्। ग्रहजन्यशुभप्रभावेण सा नारीत्वसिद्धौ अक्षुण्णा। अतो ज्योतिषदर्शनं नारीत्वबोधकम्। नारीत्वबाधकानामरिष्टग्रहाणां दुष्फलनिवारणाय च शमनविधिरवलम्बनीया।

## निष्कर्षः

निष्कर्षेणोच्यते यद् मातृत्वं केवलं शरीरस्य क्षमता नास्ति, अपि तु ग्रहाणां विशिष्टानुग्रहस्य परिणामोऽस्ति। कुण्डल्यां पञ्चमभावे पञ्चमात् पञ्चमभावे वा नवमभावे तस्मादपि पञ्चमे लग्नभावे च गुरु-चन्द्रयोः शुभसम्बन्धो नारीणामन्तःकरणे मातृत्वगुणस्य प्राचुर्यं जनयति। ज्योतिषशास्त्रीयगणनानुसारं ग्रहणामनुकूलता नारीणां मातृत्वशक्तिं, स्नेहाधिक्यं वर्धयति। तथा च प्रतिकूलतायां समुचितोपायैः सा मातृत्वशक्तिः पुनः प्रबोधिता भविष्यति। अत एतदेव सिद्धं भवति यद् नारीसशक्तीकरणस्य नाम्ना केवलं भौतिकाधिकारः पर्याप्तो नास्ति। समेषां नारीणां धर्म एव नारीत्वमस्ति। नारीत्वस्य वास्तविकं स्वरूपं मातृत्वे निहितम्। मातृत्वञ्च सृष्टिनैर्यन्तरम्। तस्या मातृत्वशक्तिश्च सृष्टिचेतनायां जागर्ति। सृष्टिस्वरूपा, सृष्टिकर्त्री सा नारी जगज्जनन्या आद्या शक्तिरिति वक्तुं शक्यते। यदि समाजो नारीं केवलं चर्मचक्षुषा पश्यति तर्हि सा नारी भोग्यारूपेण सीमितैव भवति। किन्तु यदा तां शक्तिस्वरूपां पश्यति तदा सा नारीत्वमित्यस्य व्यापकप्रकृतिं द्योतयति। अतो नारीसशक्तीकरणस्याधारः सामाजिकसुधारस्यापेक्षया आध्यात्मिकजागरणोपेतं मातृत्वमेवास्ति। पूर्वं मातृत्वं तत्पश्चादेवान्यम्। अस्मिन् शोधलेखे ज्योतिषशास्त्रं विज्ञानाधिष्ठितमस्ति। तद् विज्ञानप्रतिपादितं यद् मातृत्वमीश्वरीयवरदानमस्ति। यस्य सञ्चालनमा काशस्था ग्रहाः कुर्वन्ति। अतो मातृत्वगुणानां वर्धनाय, रक्षणाय च नारीत्वविज्ञानं समाजस्य कृते अनिवार्यम्। नारी यदा मातृरूपेण प्रतिष्ठिता भवति तदैव सा न केवलं वंशस्य, अपि तु सम्पूर्णस्य विश्वस्याधाररूपेण प्रतिष्ठिता प्रकृतिर्भवति।

## सन्दर्भग्रन्थसूची

अन्नम्भट्टः, (वि.सं.२०३२), तर्कसङ्ग्रहः, वाराणसी : चौखम्बा विद्याभवन।

अमरवाणा, (वि.सं. १९९३), अमरकोशः(टिप्पणी तथा परिशेष कुलचन्द्र गौतम), काठमाण्डू : टङ्गाल गैरीधारा।

कल्याणवर्मा, (वि.सं. २०६२), सारावली, वाराणसी : चौखम्बा कृष्णदास अकादमी।

कालिदासः, (सन् २०११), ज्योतिर्विदाभरणम्, (सम्पा. रामचन्द्रपाण्डेयः), वाराणसी : मोतीलाल बनारसीदास।

गिरि, रामानन्द, (वि.सं. २०७२), श्रीमद्भागवतमहापुराणम्- रामानन्दी टीका, (द्वितीय-खण्ड), देवघाटधाम : महेश-संस्कृत-गुरुकुलम्।

छान्दोग्योपनिषत्, (वि.सं.२०७१), गोरखपुरः : गीताप्रेस।

भट्टोजिदीक्षितः, (वि.सं. १९९५), सिद्धान्तकौमुदी, वाराणसी : मोतीलाल बनारसीदास।

दुर्गासप्तशती, (वि.सं. २०६९), (व्याख्या डा. स्वामी रामानन्द गिरि), देवघाट धाम : महेश-संस्कृत-गुरुकुलम्।

मनुः, (सन् २०१८), मनुस्मृतिः(अनु. शिवराज आचार्यः कौण्डिन्न्यायनः), वाराणसी : चौखम्बा विद्याभवन।

रामदैवज्ञः, (सन् २०१८), मुहूर्तचिन्तामणिः(सम्पा. ब्रह्मानन्द त्रिपाठी, पीयूषधारा व्याख्या.), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

वराहमिहिरः, (सन् २०१४), होराशास्त्रम् (बृहज्जातकम्)(सम्पा. सत्येन्द्र मिश्र), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

वराहमिहिरः, (वि.सं.२०६६), बृहत्संहिता, (सम्पा. सुरकान्त झा), वाराणसी : चौखम्बा कृष्णदास अकादमी।

विष्णुशर्मा, (सन् १९९४), पञ्चतन्त्रम्, वाराणसी : चौखम्बा विद्याभवन।

वैद्यनाथः, (सन् २००६), जातकपारिजातः(व्याख्या. हरिशङ्कर पाठक), वाराणसी : चौखम्बा सुरभारती प्रकाशन।

व्यासः, (सन् २०१२), गरुडमहापुराणम्सम्पा. नागशरण सिंह), दिल्ली : नाग पब्लिकेसन्स।

व्यासः, (सन् २०२२), ब्रह्मवैवर्तपुराणम्, गोरखपुरः : गीताप्रेस।

व्यासः, (वि.सं. २०५८), महाभारतम्( अनु.रामनारायणदत्तजी शास्त्री), गोरखपुरः : गीताप्रेस।

व्यासः, (वि.सं. २०५४), विष्णुपुराणम्, गोरखपुरः : गीताप्रेस।

व्यासः, ( वि.सं. २०७३), श्रीमद् देवीभागवत महापुराण (सम्पा. वेणीमाधव ढकाल), भोटाहिटी काठमाडौ : विद्यार्थी पुस्तक भण्डार।

व्यासः, ( सन् २०२४), स्कन्दपुराणम्, गोरखपुरः : गीताप्रेस।